हारीतस्य पुनः स्मृतिः। द्विगुणा सप्तमी (चतुर्दशी) या च नवम्येकादशी तथा। एषा त्रिदोषमर्य्यादा मोक्षाय च बधाय च। शुद्ध्यशुद्ध्यै ज्वरः कालं दीर्घमप्यत्र वर्त्तते। कृशानां व्याधियुक्तानां मिथ्याहारादिसेविनाम्। अल्पोऽपि दोषो दुष्ट्यादेर्लब्ध्वान्यतमतो बलम्। स प्रत्यनीको विषमं यस्मादृद्धिक्षयान्वितः। सोऽरिपक्षो ज्वरं कुर्य्याद्विषमक्षयवृद्धिभाग्। दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बली। निवर्त्तते पुनश्चैव प्रत्यनीकबलाबलः। क्षीणदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते। लीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः। आसन्नविवृतास्यत्वात् स्रोतसां रसवाहिनाम्। आशु सर्वस्य वपुषो व्याप्तिर्दोषेण जायते। सन्ततः सततस्तेन विपरीतो विपर्य्ययात्। विषमो विषमारम्भः क्षपाकालेन सङ्गवान्। दोषो रक्ताश्रयः प्रायः करोति सन्ततं ज्वरम्। अहोरात्रस्य सन्धिः स्यात् सकृदन्येद्युराश्रितः। तस्मिन्मांसवहा नाड़ी मेदोनाड़ी तृतीयके। ग्राही पित्तानिलान् मूर्द्ध्नस्त्रिकस्य कफपित्ततः। स पृष्ठस्यानिलकफात् स चैकाहान्तरः स्मृतः। चतुर्थको मलैर्मेदोमज्जास्थ्न्यन्यतरस्थिते। मज्जास्थत्यपरः प्रभावमनुदर्शयेत्। द्विविधं कफेन जङ्घाभ्यां सपूर्वं शिरसोऽनिलात्। अस्थिमज्जोभयगते चातुर्थकविपर्य्ययः। त्रिधा त्र्यहं ज्वरयति दिनमेकन्तु मुञ्चति। बलाबलेन दोषाणामनुचेष्टादिजन्मनाम्। पक्वानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत्। ज्वरः स्यात् मनसस्तद्वत् कर्म्मणश्च तदा तदा। गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात्। तल्थो भूयिष्ठदोषाणां दुश्चिकित्स्यश्चतुर्थकः। सूक्ष्मात् सूक्ष्मतरास्येषु दूराद्दूरतरेषु च। दोषो रक्तादिमार्गेषु शनैरल्पश्चिरेण यत्। याति देहस्य नाशेषं सन्तापादीन् करोत्यतः। क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः। विषमो विषमारम्भः क्षपाकालानुसारवान्। यथोत्तरं मन्दगतिर्मन्दशक्तिर्यथायथम्। कालेनाप्नोति सदृशान् स रसादींस्तथा तथा। दोषो ज्वरयति क्रुद्धश्चिराच्चिरतरेण च। भूमौ स्थितं जलैः सिक्तं कालमेव प्रतीक्षते। अङ्कुराय यथा वीजं दोषवीजं भवेत्तथा। वेगं कृत्वा विषं यद्वदाशये नीयते बलम्। कुप्यत्याप्तबलं भूयः काले दोषविषं तथा। एवं ज्वराः प्रवर्त्तन्ते विषमाः सन्ततादयः। उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम्। अरोचको वमिः श्वासः सर्व्वाङ्गिनसगे ज्वरे। रक्तनिष्ठीवनं तृष्णा अक्ष्णोस्तु पिड़कोद्गमः। दाहरागभ्रममदप्रलापो रक्तसंश्रिते। तृड्ग्लानिस्सृष्टवर्च्चस्कमन्तर्द्दाहो भ्रमस्तथा। दौर्बल्यं गात्रविक्षेपो मांसस्थे मेदसि स्थिते। स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यञ्चासहिष्णुता। प्रलापो ग्लानिररुचिरस्थिगे त्वस्थिभेदनम्। दोषप्रवृत्तिरूद्ध्वाधःश्वासाङ्गक्षेपकूजनम्। अन्तर्द्दाहो बहिःशैत्यं श्वासो हिक्का च मज्जगे। तमसो दर्शनं मर्म्मच्छेदनं स्तब्धमेढ़्रता। शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये। उत्तरोत्तरदुःसाध्याः पञ्चान्त्ये विपर्य्यये। प्रलिम्पन्निव गात्राणि श्लेष्मणा गौरवेण च। मन्दज्वरः प्रलापस्तु स शीतः स्यात् प्रलेपकः। नित्यं मन्दज्वरो रूक्षः शीतः कृच्छ्रेण गच्छति। स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेद्वातबलासकः। हरिद्राभेदवर्णाभस्तद्वल्लेपः प्रमेहति। स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः। कफवातौ समौ यत्र हीनपित्तस्य देहिनः। तीक्ष्णोऽथ वा दिवा मन्दो जायते रात्रिजो ज्वरः। दिवाकरापीतबले व्यायामाच्च विशोषिते। शरीरे नियतस्यात्ता ज्वरः स्यात् पौर्वरात्रिकः। आमाशये यदा दुष्टे श्लेष्मपित्ते ह्यधःस्थिते। तदार्द्धं शीतलं देहे त्वर्द्धं चोष्णं प्रजायते। काये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः। उष्णत्वं तेन देहस्य शीतत्वं करपादयोः। रसरक्ताश्रयः साध्यो मांसमेदोगतश्च यः। अस्थिमज्जागतः कृच्छ्रस्तैस्तैः साङ्गैर्हतप्रभः। विसंज्ञो ज्वरवेगार्त्तः सक्रोध इव वीक्ष्यते। सदोषशब्दञ्च शकृद्द्रवं मुञ्चति वेगवत्। देहो लघ्व्यपगतक्लममोहतापः पाको मुखे करणसौष्ठवमव्यथत्वम्। स्वेदः क्षवः प्रकृतिगामिमनोऽन्नलिप्सा कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि”।

माधवकरनिदाने वातिकादीनां लक्षणभेद उक्तस्तत्र वातिकस्य लक्षणं यथा

“वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्। निद्रानाशः क्षवःस्तम्भो गात्राणां रौक्ष्यमेव च। शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढ़विट्कता। शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे।

पैत्तिकस्य लक्षणं यथा

“वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः। कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते। प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च”।